पारायणं नाम लङ्केति मम मैथिलीति भक्तिः।"
इति भरतः। (पारमयन्ति समाप्तिं प्राप्नुवन्ति येनेति। अय+ल्युट् करणे इत्येके।) पुराण-पाठः। (यथा, देवीभागवते। ३।२६।१७।
"वरयेद्ब्राह्मणं शान्तं पारायणकृते तदा॥")
तत्र श्रीभागवतपाठानुक्रमो यथा,—

श्रीपार्व्वत्युवाच।

"स्कन्धैर्द्वादशभिः प्रोक्तं श्रीमद्भागवतं प्रभो!।
शुकस्तच्छ्रावयामास महाराजं परीक्षितम्॥
सप्ताहेनेति भगवन्! श्रूयते तत्र तत्र ह।
तस्यानुक्रममिच्छामि श्रोतुं तत्फलमेव च॥

सदाशिव उवाच।

साधु पृष्टम्महाभागे! लोके यत् प्रचरिष्यति।
पारायणमिति ख्यातं सद्यो मुक्तिप्रदं नृणाम्॥
शुकस्योक्तिक्रमेणैव पठेद्भागवतन्तु यः।
श्रावयेच्छृणुयाद्वापि तस्यानन्तं फलं भवेत्॥
कृतनित्यक्रियः प्रातः कृतशौचः कृतासनः।
देवद्विजगुरून्नत्वा ध्यात्वा विष्णुं सनातनम्॥
द्वैपायनं नमस्कृत्य शुकदेवञ्च भक्तितः।
हिरण्याक्षवधं यावत् प्रथमेऽहनि कीर्त्तयेत्॥
चरितं भरतस्यापि द्वितीयेऽथ तृतीयके।
मथनञ्चाम्बुधेस्तस्यापि यत्र कूर्म्मः स्वयं हरिः॥
चतुर्थदिवसे चैव दशमे हरिजन्म च।
पञ्चमे तु पठेद्विद्वान् रुक्मिण्या हरणावधि॥
षष्ठे चोद्धवसंवादं सप्तमे तु समापयेत्।
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन॥
कृते विरामे मध्ये तु अध्यायादिं पठेत् पुनः।
पठेदर्थं बुध्यमानः श्रावयेद्वैष्णवोत्तमे!॥
श्रोता तु प्राङ्मुखो भूत्वा शृणुयाद्भक्तितत्परः।
अध्याये स्वर्णमात्रैकं तथा दद्याच्च दक्षिणाम्॥
समाप्तौ च ततो धेनुं स्वर्णशृङ्गीं निवेदयेत्।
कुर्य्याच्च वैष्णवं होमं सात्वतान् भोजयेत्ततः॥
एवं यः कुरुते देवि! पाठं भागवतस्य तु।
श्रवणं श्रावणं वापि स परां गतिमाप्नुयात्।
एतत् पारायणं नाम सर्व्वकामफलप्रदम्॥
पाठकाले तु त्रिदशा सनकाद्यस्तपोधनाः।
पार्श्वदाश्च तथा विष्णोः सान्निध्यं तत्र कुर्व्वते॥
एतत्ते कथितं देवि! पारायणविधानकम्।
विष्णुप्रीतिकरं पुण्यं किम्भूयः श्रोतुमिच्छसि॥"
इति पाद्मे पातालखण्डे पारायणमाहात्म्ये ७१ अध्यायः॥ * ॥ अपिच।

कुमारा ऊचुः।

"अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिम्।
सहायैर्व्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः॥
दैवज्ञन्तु समाहूय मुहूर्त्तं पृच्छ यत्नतः।
विवाहे यादृशं वित्तं तादृशं परिकल्पयेत॥
नभस्य आश्विनोर्ज्जौ च मार्गशीर्षः शुचिर्नभाः।
एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः॥
मासानां निर्णये यानि तानि त्याज्यानि सर्व्वथा।
सहायाश्च त एवात्र कर्त्तव्याः सोद्यमाश्च ये॥
देशे देशे तथा चेयं वार्त्ता प्रेष्या प्रयत्नतः।
भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्त्तनाः।
स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत्॥
देशे देशे विरक्ता ये वैष्णवाः कीर्त्तनोत्सुकाः।
तेष्वेव पत्रं प्रेष्यञ्च तल्लेखनमितीरितम्॥
सतां समाजो भविता सप्तरात्रं सुदुर्लभः।
अपूर्व्वरसरूपैव कथा चात्र भविष्यति॥
श्रीभागवतपीयूषकथासु रसलम्पटाः।
भवन्तश्च तदा शीघ्रमायान्तु प्रेमतत्पराः॥
नावकाशः कदाचिद्वा दिनमात्रं तथापि वा।
सर्व्वथा गमनं कार्य्यं क्षणोऽत्रैव सुदुर्लभः॥
एवमाकारणं तेषां कर्त्तव्यं विनयेन च।
आगन्तुकानां सर्व्वेषां वासस्थानानि कल्पयेत्॥
तीर्थे चैव वने चापि गृहे वा श्रवणं स्मृतम्।
विशाला वसुधा यत्र कर्त्तव्यं तत्कथास्थलम्॥
शोधनं मार्ज्जनं भूमेर्लेपनं धातुमण्डनम्।
गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत्॥
अर्व्वाक् पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत्।
कर्त्तव्यं मण्डपं प्रोच्चैः कदलीखण्डमण्डितम्॥
फलपुष्पदलैर्व्विष्वक् विताने च विराजितम्।
चतुर्दिक्षु ध्वजारोपो बहुसम्पद्विराजितः॥
ऊर्द्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरम्।
तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबुध्य च॥
पूर्व्वं तेषामासनानि कर्त्तव्यानि यथोत्तरम्।
वक्तुश्चापि तथा दिव्यमासनं परिकल्पयेत्॥
उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा।
प्राङ्मुखोऽथ भवेद्वक्ता श्रोता चोदङ्मुखस्तदा॥
अथवा पूर्व्वदिक् ज्ञेया पूज्यपूजकमध्यतः।
श्रोतॄणामागमः प्रोक्तो देशकालादिकोविदैः॥
विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिमान्।
दृष्टान्तकुशलो धीरो वक्ता कार्य्योऽतिनिस्पृहः॥
अनेकधर्म्मविभ्रान्ताः स्त्रैणाः पाषण्डवादिनः।
शुकशास्त्रकथोच्चारे त्याज्यास्ते येऽपि पण्डिताः।
वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः॥
पण्डितः संशयच्छेत्ता लोकबोधनतत्परः॥
वक्त्रा क्षौरं प्रकर्त्तव्यं दिनादर्व्वाक् व्रताप्तये।
अरुणोदयेऽसौ निर्व्वत्य शौचं स्नानं समाचरेत्॥
मण्डलञ्च प्रकर्त्तव्यं तत्र स्थाप्यो हरिस्तथा।
कृष्णमुद्दिश्य मन्त्रेण चरेत् पूजाविधिं क्रमात्।
प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत्॥
संसारसागरे मग्नं दीनं मां करुणानिधे!।
कर्म्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात्॥
श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः।
कर्त्तव्या विधिना प्रीत्या धूपदीपसमन्विता॥
ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत्।
स्तुतिः प्रसन्नचित्तेन कर्त्तव्या केवलं तदा॥
श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि।
स्वीकृतोऽसि मया नाथ! मुक्त्यर्थं भवसागरे॥
मनोरथो मदीयोऽयं सफलः सर्व्वथा त्वया।
निर्व्विघ्नेनैव कर्त्तव्यो दासोऽहं तव केशव!॥
एवं दीनं वचः प्रोक्ता वक्तारञ्चाथ पूजयेत्।
संभूष्य वस्त्रभूषाभिः पूजान्ते तञ्च संस्तवेत्॥
शुकरूपप्रबोधज्ञः सर्व्वशास्त्रविशारदः।
एतत्कथाप्रकाशेन मदज्ञानं विनाशय॥
तदग्रे नियमः पश्चात् कर्त्तव्यः श्रेयसे मुदा।
सप्तरात्रं यथाशक्त्या धारणीयः स एव हि॥
वरणं पञ्चविप्राणां कथाभागनिवृत्तये।
कर्त्तव्यं तैर्हरेर्जप्यं द्वादशाक्षरविद्यया॥
ब्राह्मणान् वैष्णवांश्चान्यांस्तथा कीर्त्तन-कारिणः।
नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत्॥
लोकवित्तधनागारपुत्रचिन्तां व्युदस्य यः।
कथाचित्तः शुद्धमतिः स लभेत् फलमुत्तमम्॥
आसूर्य्योदयमारभ्य सार्द्धं त्रिप्रहरान्तकम्।
वाचनीया कथा सम्यक् धीरकण्ठं सुधीमता॥
कथाविरामः कर्त्तव्यो मध्याह्ने घटिकाद्वयम्।
तत्कथामनु कार्य्यं वै कीर्त्तनं वैष्णवैस्तदा॥
मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः।
हविष्यान्नेन कर्त्तव्यो ह्येकवारं कथार्थिना॥
उपोष्य सप्तरात्रं वा शक्तिश्चेत् शृणुयात्तदा।
घृतपानं पयःपानं कृत्वा वा शृणुयात् सुखम्॥
फलाहारेण वा श्राव्यमेकभक्तेन वा पुनः।
सुखसाध्यं भवेद्यत्तु कर्त्तव्यं श्रवणाय तत्॥
भोजनन्तु वरं मन्ये कथाश्रवणकारकम्।
नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि॥
सप्ताहव्रतिनां पुंसां नियमान् शृणु नारद!।
विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे॥
ब्रह्मचर्य्यमधःसुप्तिः पत्रावल्याञ्च भोजनम्।
कथासमाप्तौ भक्तिञ्च कुर्य्यान्नित्यं कथाव्रती॥
द्विदलं मधु तैलञ्च गरिष्ठान्नन्तथैव च।
भावदुष्टं पर्य्युषितं जह्यान्नित्यं कथाव्रती॥
वृन्ताकञ्च कलिङ्गञ्च दग्धमन्नं मसूरिकाम्।
निष्पावमामिषाद्यञ्च वर्ज्जयेत्तु कथाव्रती॥
पलाण्डुं लशुनं हिङ्गुं मूलकं गृञ्जनन्तथा।
नालिकाम्लकुष्माण्डं नैवाद्याच्च कथाव्रती॥
देववैष्णवविप्राणां गुरुगोव्रतिनान्तथा।
स्त्रीराजमहतां निन्दां वर्ज्जयेच्च कथाव्रती॥
कामं क्रोधं मदं दानं मत्सरं लोभमेव च।
दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती॥
रजस्वलान्त्यजम्लेच्छपतितव्रात्यकैस्तथा।
द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती॥
सत्यं शौचं दयां मौनं मार्ज्जनं विनयन्तथा।
उदारं मानसं तद्वत् कुर्य्यादेवं कथाव्रती॥
दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्म्मवान्।
अनपत्यो मोक्षकामः शृणुयात् स कथामिमाम्॥
अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका।
स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः॥
एतेन विधिना दत्तं तदक्षयतरं भवेत्।
अत्युत्तमादिना सप्तकोटियज्ञफलप्रदः॥
एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत्।
जन्माष्टमीव्रतवत् कर्त्तव्यं फलकाङ्क्षिभिः॥
अकिञ्चनेषु भक्तेषु प्रायो नोद्यापनाग्रहः।
श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः॥
एवं नगाहयज्ञेऽस्मिन् समाप्ते श्रोतृभिस्तदा।
पुस्तकस्य च वक्तुश्च पूजा कार्य्यातिभक्तितः॥